# Ganeshaksharamalika Stotram Gitam

# गणेशाक्षरमालिकास्तोत्रगीतम्

## Document Information

Text title : Ganeshaksharamalika Stotram Gitam

File name : gaNeshAkSharamAlikAstotragItam.itx

Category : ganesha, stotra, gItam

Location : doc_ganesha

Author : Venkatasubrahmanyam

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

*sanskritdocuments.org*

# गणेशाक्षरमालिकास्तोत्रगीतम्

(वेङ्कटसुब्रह्मण्यकृतं गणेशाक्षरमालिकास्तोत्रं अथवा गणेशाक्षरमालिकागीतम्)
अगजाप्रियसुत वारणपतिमुख षण्मुखसोदर भुवनपते
शुभसिद्धि विनायक सिद्धिविनायक सिद्धिविनायक पालय मां -
शुभसिद्धिविनायक पालय माम् । १
आगमशतनुत मारितदितिसुत माराििप्रिय मन्दगते । २
इज्याध्ययनमुखाखिलसत्कृति परिशुद्धान्तः करणगते । ३
ईर्ष्यारोषकषायितमानसदुर्जन दूरपदाम्बुरुह । ४
उत्तमतरसत्फलदानोद्यत बलरिपुपूजित शूलिसुत । ५
ऊहापोह विशारद संयमिवर्गकृताभय ढुण्ढिविभो । ६
ऋद्धिसुखाभयविश्राणनजनितातुलकीर्ति चयैकनिधे । ७
रूक्षाक्षरततिभर्त्सित दुर्गतवित्तविनाशन विघ्नपते । ८
लुप्तजगद्भय दिव्यगदायुध पोषितदीनजनामित भो । ९
लूतातन्तु सरूपजगच्चयनिर्मितिदक्षदृगन्त विभो । १०
एणाङ्कार्धविभूषितमस्तक लम्बोदर गजदैत्यरिपो । ११
ऐश्वर्याष्टकनियतनिकेतन पुण्ड्रोज्ज्वल शुभदिव्यकर । १२
ओतं प्रोतमिदं हि जगत्त्वयि स्रज्यहिवत्परिपूर्णसुखे । १३
औदास्यं मयि विघ्नतमः कुलमार्तण्ड प्रभ मा रचय । १४
अङ्घ्रियुगे तव सन्ततसद्रतिमाशु विधत्स्व गणेश मम । १५
अश्वस्तनगृहदारसुहृद्भवबन्धं विगलय मे त्वरया । १६
कमनीयामितशोणिमदीधिति सन्ध्या भीकृतदिग्वलय । १७
खण्डितभण्ड सहोदरनिर्मित विघ्नशिलामलशील गुरो । १८
गन्धर्वामरकिन्नरनरगणपूजितसज्जन दिव्यनिधे । १९
घुमुघुमिताखिलविष्टपदिव्यमद स्रुतिराजितगण्डयुग । २०
ङर (२५)तत्वात्मक वेददलाम्बुजमध्यगतारुणशोभतनो । २१
चञ्चलघोणसमुद्धृत पीतोज्झित जलपूरितवारिनिधे । २२

छायासहचर कोटिसुभास्वर निखिलगुणाकर सन्मतिद । २३
जम्भारिप्रमुखामर पुष्कर दिवसकराङ्कुशकर वरद । २४
झञ्झानिलमददूरीकृतिचण कर्णानिलधूताभ्रचय । २५
ज्ञप्तिसदानन्दात्मक निज वररदभान्यक्कृतशीतकर । २६
टङ्कायुधवर मस्तकखण्डन यत्नविचित्रितभीतसुर । २७
ठान्ताब्जालयवदनालोकाविस्तरकामेश्या दयित । २८
डोलायितरवि शशधरमण्डलतालातोषित सान्ध्यनट । २९
ढक्कावादनतुष्टामरगण बृंहित शिक्षितलोकतते । ३०
णान्ततदर्थ पदार्थ महार्थद पालय मां करुणालय भो । ३१
तूलोपमविभ्रामितभूधर निश्वासानिल लोकपते । ३२
थार्णवजलतति फूत्कृति विशदितमणिवर भास्वरिताण्डचय । ३३
दरवर्णात्ममनूत्तमशीलिवितीर्ण दुरापपुमर्थतते । ३४
धर्मैकप्रिय धार्मिकतारक मोदकभक्षण नित्यरत । ३५
नानालोकनिवासि मनोरथलतिकामाधवदृक्प्रसर । ३६
परमाश्चर्यानुपममनोहरविहरण पोषितलोकतते । ३७
फालविलोचन फणिवरभूषण फलतातितर्पितकामचय । ३८
बालेन्दुज्ज्वल फाललसच्छवि तिर्यक्पुण्ड्रावलिललित । ३९
भगणाभामित मणिवरभूषित भस्मोद्धूलितचारुतनो । ४०
मूषिकवाहन मुनिजनपोषण मूर्तामूर्तोपाध्यगत । ४१
यामुनवारिविहारिसमर्चित यातायातक्लेशहर । ४२
रतिपतिपूजित लावण्याकर राकेन्दुज्वलनखराले । ४३
लवणरसानन्तरजलनिधिवर सुमणिद्वीपान्तरसदन । ४४
वाराणस्यावासकुतूहल चिन्तामणिसाक्ष्याद्यभिध । ४५
शङ्करतोषित दमयन्त्यर्चित राघवपूजित रतिवरद । ४६
षड्गुणरत्नाकर लम्बोदर बीजापूरप्रिय सुमुख । ४७
सर्वकृति प्रथमार्चित गौतमपत्नीसेवित यमिकुलप । ४८
हेरम्बाश्रितपालन चामरकर्ण सुजम्बूफलभक्ष । ४९
लक्ष्मीपतिमहितातुलविक्रम रोहितताताखिलवरद । ५०
क्षेमं कुरु जगतामखिलार्थद वेङ्कटसुब्रह्मण्यनुत । ५१
इत्थमियं पण(५१)वर्णमणिस्रक् सिद्धिगणाधिप पदकमले ।
निहिता ये ह्यनया स्तोष्यन्त्याप्स्यन्त्यखिलार्थास्त्वरया ते ।

(शुभसिद्धिविनायकेति पङ्क्तिद्वयं प्रतिपङ्क्त्यन्तं संयोज्य गीयते)

Footnote : After each line numbered 2-51,
sing the two lines given in the first verse,
starting with शुभसिद्धिविनायक

इति वेङ्कटसुब्रह्मण्यकृतं गणेशाक्षरमालिकास्तोत्रं (गीतम्) सम्पूर्णम् ।

Proofread by Narendran Madathil

---

*Ganeshaksharamalika Stotram Gitam*

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*